न्नवाननीरदाकृतिर्विदेशतो महोन्नतिः ॥ ४ ॥

अन्वयः—(यदि) अगौ प्रकाशने (तदा) नृणां शुभासने स्थितिः, शुभाकृतिः, धनोन्नतिर्गुणोन्नतिः सदाविदां धराधिपाधिकारिता यशोलता, नवीननीरदाकृतिः, ततः विदेशतः महोन्नतिः भवेत् ॥ ४ ॥

भा०-यदि राहु प्रकाशन अवस्था में हो तो उस मनुष्य को उच्चपद मिलता है, श्रेष्ठ कर्म करता है धन और गुणका विशेष उन्नति करता है, आजन्म पंडित (सद्बुद्धि) पदको प्राप्त करता है, राज्यकुल से प्राप्त की हुई प्रतिष्ठा की लता बहुत ही दूर तक फैलती है, नये मेघ की तरह (श्याम) कान्ति शरीर की होती है और विदेश से बहुत बड़ी प्रतिष्ठा प्राप्त करता है ॥ ४ ॥

गमने च यदा राहौ बहुसन्तानवान्नरः ।
पण्डितो धनवान्दाता राजपूज्यो नरोत्तमः ॥ ५ ॥

अन्वयः—(यदा) राहौ गमने (तदा) नरः बहु सन्तानवान्, पण्डितः, धनवान्, दाता राज्यपूज्यः नरोत्तमश्च भवति ॥ ५ ॥

भा०—यदि राहु गमनावस्था में बैठा हो तो वह मनुष्य बहुत संतानवाला, पण्डित, धनवान्, दान करनेवाला, राजा से आदर पानेवाला और श्रेष्ठ पुरुष (आदर्श पुरुष) होता है ॥ ५ ॥

राहावागमने क्रोधी सदा धीधनवर्जितः ।
कुटिलः कृपणः कामी नरो भवति सर्वथा ॥ ६ ॥

अन्वयः—(यदा) राहौ आगमने (तदा) नरः क्रोधी, सदा धीधन वर्जितः कुटिलः, कृपणः, (तथा) सर्वथा कामी भवति ॥ ६ ॥

भा०—यदि राहु आगमन अवस्था में हो तो वह मनुष्य क्रोधी, सदा बुद्धि और धन से हीन, खल, कृपण और अति कामी होता है ॥ ६ ॥

सभागते यदा राहौ पण्डितः कृपणो नरः ।
नानागुणपरिक्रान्तो वित्तसौख्यसमन्वितः ॥७॥

अन्वयः—यदा राहौ सभा (अवस्था) गते (तदा) नरः पण्डितः, कृपणः, नानागुणपरिक्रान्तः (तथा) वित्तसौख्यसमन्वितः स्यात् ॥ ७ ॥

भा०—यदि राहु सभा अवस्था में हो तो वह मनुष्य, पण्डित, कृपण, अनेक गुणों से युक्त और धन तथा शरीर सुख से सम्पन्न होता है ॥ ७ ॥

चेदगौवागमं यस्य याते तदा
व्याकुलत्वं सदाऽरातिभीत्या महत् ।
बन्धुवादो जनानां निपातो
भवाद्वित्तहानिः शठत्वं कृशत्वं तथा ॥८॥

अन्वयः—चेद्गौ यस्य आगमं याते तदा (नरः) आरातिभीत्या सदा व्याकुलत्वं, महद्बन्धुवादः जनानां निपातः वित्तहानि, शठत्वं, तथा कृशत्वं भवेत् ॥ ८ ॥

भा० –यदि राहु जिसके आगम अवस्थाका हो तो शत्रुओंके भयसे सदा घबड़ाये हुए रहता है, बन्धु वर्गोंसे बहुत ही विवाद रहता है, परिवार हीन दशामें रहता है, धनकी हानि होती है, कृपण होता है और शरीरसे कमजोर भी रहता है ॥ ८ ॥

भोजने भोजनेनालं विकलो मनुजो भवेत् ।
मन्दबुद्धिः क्रियाभीरुः स्त्रीपुत्रसुखवर्जितः ॥ ९॥

अन्वयः—(यदि राहौ) भोजने [तदा] मनुजः भोजनेन अलं विकलं, मन्दबुद्धिः, क्रियाभीरुः [तथा] स्त्रीपुत्रसुखवर्जितः भवेत् ॥ ९ ॥

भा—यदि राहु भोजन अवस्था में हो तो उस मनुष्य का भोजन पर्याप्त नहीं मिलता है, बुद्धिहीन, धर्म कर्म से रहित और स्त्री, पुत्र सुख से वञ्चित होता है ॥ ९ ॥

नृत्यलिप्सागते राहौ महाव्याधिविवर्द्धनम् ।
नेत्ररोगं रिपोर्भीतिर्द्धनधर्मक्षयो नृणाम् ॥ १० ॥

अन्वयः—(यदा) राहौ नृत्यलिप्सागते (तदा) नृणां महाव्याधिविवर्द्धनं, नेत्ररोगं, रिपोर्भीतिः (तथा) धन धर्मविवर्जितः (भवेत्) ॥१०॥

भा०—यदि राहु नृत्यलिप्सा अवस्था में हो तो उस मनुष्य का रोग विशेष कष्टकारक होता है, आँखोंमें कष्ट, शत्रुओंसे भय और धन धर्मसे रहित होता है ॥ १० ॥

कौतुके च यदा राहौ स्थानहीनो नरो भवेत् ।
परदाररतोनित्यं परवित्तापहारकः ॥ ११ ॥

अन्वयः—यदा राहौ कौतुके (तदा) नरः स्थानहीनः, परदाररतः (तथा) नित्य परवित्तापहारकः भवेत् ॥ ११ ॥

भा०—यदि राहु कौतुक अवस्थामें हो तो उस मनुष्य का गृह स्थिर नहीं रहता है, पर स्त्री गामी और पराये धनका अपहरण करनेवाला होता है ॥ ११ ॥

निद्रावस्थागते राहौ गुणग्रामयुतो नरः ।
कान्तासन्तानवान्धीरो गर्वितो बहुवित्तवान् ॥ १२ ॥

अन्वय—[यदि] राहौ निद्रावस्थागते (तदा) नरः गुणग्रामयुतः कान्तासंतानवान्, धीरः, गर्वितः (तथा) बहुवित्तवान् (भवेत्) ॥ १२ ॥

भा०—यदि राहु निद्रा अवस्था में हो तो वह मनुष्य अनेक गुणों से युक्त और शहर का मालिक होता है, स्त्री पुत्रसे युक्त, गम्भीर, घमण्डी और बहुत धन वाला होता है ॥ १२ ॥

अथ केतोरवस्थाफलानि--

मेषे वृषेऽथ वा युग्मे कन्यायां शयनं गते ।
केतौ धनसमृद्धिः स्यादन्यभे रोगवर्द्धनम् ॥ १ ॥

अन्वयः--अथ केतौ, मेषे वृषे, युग्मे वा कन्यायां शयनं गते (तदा) धनसमृद्धिः अन्यभे रोग वर्द्धनं स्यात् ॥ १ ॥

भा०—अब केतुके अवस्थाका फल कहते हैं यदि केतु मेष, वृष, मिथुन, अथवा कन्या राशिमें बैठा हुआ शयन अवस्थागत हो तो उस मनुष्यका धन विशेष बढ़ता है, दूसरे राशिका होकर शयन अवस्था का हो तो रोग विशेष बढ़ता है ॥ १ ॥

उपवेशं गते केतौ दद्रुरोगविवर्द्धनम् ।
अरिव्रातनृपव्यालचौरशङ्कासमन्ततः ॥ २ ॥

अन्वयः—केतौ उपवेशंगते (तदा) दद्रुरोगविवर्द्धनम्, अरिव्रात-नृपव्यालचौरशङ्कासमंततः ॥ २॥

भा०—यदि केतु उपवेशन अवस्था गत हो तो उस मनुष्यका दादरोग अधिक वढता है (कष्टकारक होता) है, शत्रु, राजा, सर्प और चोरोंसे कष्ट पाने की आशंका सदा बनी रहती है ॥ २ ॥

नेत्रपाणि गते केतौ नेत्ररोगः प्रजायते ।
दुष्टसर्पादिभीतिश्च रिपुराजकुलादपि ॥
वित्तं विनाश मायाति मतिश्च चपला भवेत् ॥ ३ ॥

अन्वयः— यदि केतौ नेत्रपाणि गते (तदा) नेत्ररोगः प्रजायते दुष्ट सर्पादि भीतिः, च रिपुराजकुलादपि [भीतिः], वित्तं विनाशं आयाति, [तथा] चपला मतिः भवेत् ॥ ३ ॥

भा०—यदि केतु नेत्रपाणि अवस्थामे हो तो नेत्रोंमें रोग होता है, दुष्टजन सर्प इत्यादि से भय होता है, शत्रु और राज्यकुल से भी अनेक उपद्रवका भय होता है, धनका नाश हो जाता है और उसकी बुद्धि अत्यन्त चञ्चल हो जाती है॥३॥

प्रकाशने गते केतौ धनधान्यसमुन्नतिः ।
राजमानं यशो लाभं विदेशे सौख्यमाप्नुयात् ॥ ४ ॥

अन्वयः –[यदि] केतौ प्रकाशने गते [तदा नरस्य] धनधान्य समुन्नतिः, राजमानं यशालाभं [तथा विदेशे सौख्यमाप्नुयात् ॥ ४ ॥

भा० – यदि केतु प्रकाशन अवस्था में हो तो उस मनुष्य के धन, धान्य की वृद्धि होती है, राजदरबारमें प्रतिष्ठा पाता है, उसका यश दूर तक फैलता है और परदेश से विशेष धन पाता है ॥ ४ ॥

गमने तु यदा केतौ पुत्रसम्पत्ति मान्नरः ।
पण्डितो राजमानी च धनेन परिपूरितः ॥ ५ ॥

अन्वयः—यदा तु केतौ गमने [तदा] नरः पुत्र सम्पत्तिवात् [भवेत्] पण्डितः, राजमानी च [तथा] धनेन परिपूरितः (स्यात्) ॥ ५ ॥

भा०—यदि केतु गमन अवस्थामें हो तो वह मनुष्य सन्तान और धनसे युक्त होता है, विद्वान् होकर राज्यकुलसे प्रतिष्ठा पाता है और बहुत बड़ा धनवान् होता है ॥ ५ ॥

केतावागमने दुष्टमतिः श्रीरहितः पुमान्।
कामी धीधर्महीनश्च जायते क्रोधनः शठः ॥ ६ ॥

अन्वयः—[यदि] केतौ आगमने (तदा) पुमान् दुष्टमतिः, श्रीरहितः, कामी, धीधर्महीनः, क्रोधनः, शठश्च जायते ॥ ६ ॥

भा० यदि केतु आगमन अवस्थामें हो तो वह दुष्टस्वभाव वाला धन हीन, कामातुर, बुद्धि तथा धर्मसे रहित, क्रोधी और कृपण होता है ॥ ६ ॥

सभावस्थागते केतौ वाचालो बहुगर्वितः।
कृपणो लम्पटश्चैव धूर्तविद्याविशारदः ॥ ७ ॥

अन्वय—[यदा] केतौ सभा अवस्थागते (तदा नरः वाचालः, बहुगर्वितः, कृपणः, लम्पटः, च धूर्तविद्याविशारदः (स्यात्) ॥ ७ ॥

भा०—यदि केतु सभा अवस्थामें हो तो वह मनुष्य कुटिल, घमण्डी, कृपण कामी और धूर्तविद्यामें अति निपुण होता है ॥ ७ ॥

यदागमे भवत्केतुः केतुः स्यात्पापकर्मणाम् ॥
बन्धुवादरतो दुष्टो रिपुरोगनिपीडितः ॥ ८ ॥

अन्वय—यदा केतुः आगमे भवत् (तदा नरः) पापकर्मणां केतुः स्यात्, बन्धुवादरतः दुष्टः, रिपुरोगनिपीडितः स्यात् ॥ ८ ॥

भा०—यदि केतु आगम अवस्थामें हो तो वह मनुष्य पापियोंमें ध्वजारूप (महापापी) होता है, परिवारोंसे विरोध करता है, दुष्टस्वभाव वाला होता है और शत्रु तथा रोगसे दुखी होता है ॥ ८ ॥

भोजने तु जनो नित्यं क्षुधया परिपीडितः।
दरिद्रो रोगसंतप्तः केतौ भ्रमति मेदिनीम् ॥ ९ ॥

अन्वयः—(यदि) केतौ भोजने (तदा) जनः नित्यं क्षुधया परिपीडितः, दरिद्रः रोगसंतप्तः (तथा) मेदिनीं भ्रमति ॥ ९ ॥

भा०—यदि केतु भोजन अवस्थागत हो तो वह मनुष्य क्षुधासे नित्य

दुःखी रहता है और दरिद्र रूपी रोग से पीड़ित होकर जीविका के लिये भूमण्डल में भ्रमण करता फिरता है॥ ९॥

नृत्यलिप्सागते केतौ व्याधिना विकलो भवेत्।
बुद्बुदाक्षो दुराधर्षो धूर्त्तोऽनर्थकरो नरः॥ १०॥

अन्वयः—केतौ नृत्यलिप्सागते (तदा) नरः व्याधिना विकलः बुद्बुदाक्षः दुराधर्षः, धूर्त्तः (तथा) अनर्थकरो भवेत्॥ १०॥

भा०—यदि केतु नृत्यलिप्सा अवस्थामें हो तो वह मनुष्य रोगसे विकल रहता है, उसकी आँख बुद्बुदाकार (सदा पानी देनेवाली) होती हैं, अत्यन्त साहसी, वाचाल और नीच कर्म करनेवाला होता है॥ १०॥

कौतुकी कौतुके केतौ नटवामारतिप्रियः।
स्थानभ्रष्टो दुराचारो दरिद्रो भ्रमते महीम्॥ ११॥

अन्वयः—(यदि) केतौ कौतुके (तदा नरः) कौतुकी, नटवामारतिप्रियः, स्थानभ्रष्टः, दुराचारः दरिद्रः महीं भ्रमते॥ ११॥

भा०—यदि केतु कौतक अवस्था में हो तो वह मनुष्य खेल, तमाशा करने वाला, नर्तकी स्त्रियों (वेश्याओं) के साथ भोग विलास करनेवाला, दूसरे गृहमें गुजर करने वाला दुष्टकर्ममें रत रहनेवाला और धनहीन होकर जहाँ तहाँ ठोकर खानेवाला होता है॥ ११॥

निद्रावस्थागते केतौ धनधान्यसुखं महत्।
नानागुणविनोदेन कालो गच्छति जन्मिनाम्॥ १२॥

अन्वयः—केतौ निद्राअवस्थागते तदा जन्मिनां धनधान्यमहत्सुखं, (तथा) नानागुणविनोदेन कालः गच्छति॥ १२॥

भा०—यदि केतु निद्रा अवस्थामें हो तो वह मनुष्य द्रव्य तथा अन्नके खजाना से अति सुखी होता है और अनेक प्रकार के गुणों तथा व्यवसायोंसे सुखपूर्वक समय व्यतीत करता है॥ १२॥

इति श्रीभावकुतूहले उत्साहवर्द्धिनी सान्वयभाषाटीकायां ग्रहाणामवस्थाविचारे द्वादशोऽध्यायः॥ १२॥

त्रयोदशोऽध्यायः

अथ ग्रहाणां बालाद्यवस्था फलानि—

बालो रसांशैरसमे प्रदिष्ट-
स्ततः कुमारो हि युवाथवृद्धः ।
मृतः क्रमादुत्क्रमतः समर्क्षे
बालाद्यवस्थाः कथिता ग्रहाणाम् ॥ १ ॥

अन्वयः—अथ ग्रहाणां बालाद्यवस्थाः कथिता हि असमे विषम राशौ क्रमात् रसांशैः बालः ततः कुमारः ततः युवा, [तत] वृद्धः, (ततः) मृतः । समर्क्षे (समराशौ) उत्क्रमतः स्यात् ॥ १ ॥

भा०—अब ग्रहों की बालादि अवस्था कहते हैं, विषम (मेष, मिथुन, सिंह इत्यादि) राशियों में ६ अंश पर्यन्त ग्रहों की बाल अवस्था इसके बाद १२ अंश तक कुमार अवस्था, और इसके बाद १८ अंश तक युवा अवस्था इसके बाद २४ अंश तक वृद्धा अवस्था और ३० अंश पर्यन्त मृतक अवस्था है, सम (वृष, कर्क, कन्या इत्यादि) राशियों में इसका उलटा जैसे प्रथम ६ अंश तक मृत अवस्था, १२ अंश तक वृद्धा अवस्था, १८ अंश तक युवा अवस्था, २४ अंश तक कुमार अवस्था और ३० अंश पर्यन्त बाल अवस्था होती है ॥ १ ॥

फलं तु किंचिद्धि तनोति बाला-
च्चार्द्धं कुमारः प्रयतेन पुंसाम् ।
युवा समग्रं खचरोऽथ वृद्धः
फलं तु दुष्टं मरणं मृताख्यः ॥ २ ॥

अन्वयः—अथ च पुंसां खचरः बालः किञ्चित् फलं, कुमारः अर्द्धं फलं, तु युवा समग्रं फलं, वृद्धः दुष्टं फलं [तथा च] मृताख्यः प्रयतेन मरणं तनोति ॥२॥

भा०—जिस मनुष्य के जन्म समय में बाल अवस्था गत ग्रह हो तो शुभा-शुभ फल बहुत ही थोड़ा देते है, कुमार अवस्था वाले आधा युवा अवस्था वाले पूर्ण, वृद्धा अवस्था वाले अनिष्ट और मृत अवस्था वाले ग्रह अपने दशान्तर्दशा में मृत्यु तुल्य फल (कष्ट) देते हैं ॥ २ ॥

अथ दीप्ताद्यवस्थाः—

उच्चे दीप्तः स्वभे स्वस्थो मित्रभे हर्षितो भवेत् ।
शान्तः शोभनवर्गस्योऽतिशस्तो दीप्तदीधितिः ॥३॥
लुप्तोऽस्ते नीचभे दीनः पीडितः पापशत्रुभे ।
एवमष्टौ न भोगानां भावा दीप्तादिभेदतः ॥४॥

अन्वयः - उच्चे दीप्तः स्वभे स्वस्थः मित्रभे हर्षितः, शोभनवर्गस्थः शान्तः, दीप्तदीधितिः अतिशस्तः अस्ते लुप्त नीचभे दीनः, पापशत्रुभे पीड़ितः, एव दीप्तादिभेदतः नभो गानां अष्टौ भावः (भवन्ति)॥३-४॥

भा०--अब ग्रहों की दीप्तादि अवस्था बताते हैं-जो ग्रह अपने उच्च स्थान में बैठा हो उसकी दीप्त अवस्था, अपने घर में हो तो स्वस्थ अवस्था, मित्र के घर में बैठा हो तो हर्षित अवस्था, शुभ ग्रहों के घरमें बैठा हो तो शांत अवस्था जो ग्रह अपने परम तेज से युक्त (उदय) हो तो उसको अतिशस्त अवस्था, अस्त हो तो लुप्त अवस्था, नीच राशिमें दीन अवस्था और पाप ग्रहों की राशि अथवा शत्रु की राशि में पीड़ित अवस्था, इस प्रकार दीप्तादि भेद से ग्रहों की आठ अवस्था बताई गई है ॥३-४॥

दीप्ते मदोन्मत्तगजेन्द्रगन्ता
सदारिहन्ता वरतीर्थगन्ता ।
कान्तो मनस्वी नितरां यशस्वी
प्रदीप्तवेषो मनुजो महीपः ॥५॥

अन्वयः—दीप्ते (ग्रहे तदा) मनुजः मदोन्मत्तगजेन्द्रगन्ता, सदारिहन्ता, वरतीर्थगन्ता, कान्तः मनस्वी, नितरां यशस्वी (तथा) प्रदीप्त वेषः महीपः (स्यात्) ॥ ५ ॥

भा०—दीप्त ग्रह की दशा में मनुष्य अति मदान्ध हाथियों की सवारी पर बैठकर सफर करता है, सर्वदा शत्रुओं का विध्वंश करता है, अच्छे अच्छे तीर्थों की यात्रा करता है, उसकी स्त्री मनस्वी होती है, उसका यश दूर तक फैलता है, और अत्यन्त सुन्दर शरीर पाकर राजा होता है ॥५॥

स्वस्थे गुणागारजयालयाना-
मुपार्जको वैरिविनाशकर्त्ता ।

नरोऽप्युदारो नृपपूजितः स्या-
द्विशालकीर्तिः कमनीयमूर्तिः ॥६॥

अन्वयः--स्वस्थे ग्रहे तदा नरः गुणागारजयालयानामुपार्जकः, वैरिविनाशकर्त्ता, उदारः, नृपपूजितः, विशालकीर्तिः, (तया) कमनीय मूर्तिः स्यात् ॥ ६ ॥

भा०—स्वस्थ अवस्था वाले ग्रह की दशा में मनुष्य पाठशाला, वेधालय और किला कोट तथा फौज रखने के लिए बारिक वगैरहः बनवाता है अथवा शत्रुओं से जीत कर उस पर अपना सत्ता जमा बैठता है, सर्वदा शत्रुओं का नाश करता है, उदार स्वरूप, राजाओं में श्रेष्ठ बढ़ी कीर्ति और नटवर मूर्ति वाला होता है ।।६।।

हर्षिते भवति हर्षितः सदा
मित्रपुत्रपरिपूरितो मुदा ।
धर्मकृन्मणिगणेन मण्डितः
पण्डितः परमदैवविज्जनः ॥७॥

अन्वयः—हर्षिते जनः हर्षितः, सदा मुदा मित्रपुत्रपरिपूरितः धर्मकृत्, मणिगणेन मण्डितः (तथा) परमदैवविज्जनो भवति ।। ७ ।।

भा० हर्षित अवस्था वाले ग्रह की दशा में मनुष्य प्रसन्न रहता है, सर्वदा सच्चा मित्र और सत्पुत्र से युक्त रहता है, सुकर्म करता है, रत्नादि से परिपूरित और कर्म विपाक का जाननेवाला बहुत बड़ा विद्वान (ज्योतिषी) भी होता है ७।

शान्तेऽतिशान्तो युवराजराजो
जनो महौजा जनतासमेतः ।
अनेकविद्यामलगद्यपद्या-
भ्यासानुरक्तः खलु वित्तयुक्तः ॥८॥

अन्वयः-शान्ते (ग्रहे) जनः अतिशान्तः, युवराजराजः, महौजा जनतासमेत, अनेकविद्यामलगद्यपद्याऽभ्यासानुरक्तः, खलु वित्त युक्तः (स्यात्) ॥ ८ ॥

भा०—शान्त अवस्था ग्रह की दशा में मनुष्य अत्यन्त शान्त रहता है, युवराजों का राजा होता है, ओजस्वी (प्रतापी) मनुष्यों का साथ रहता है,

स्वयं प्रतापी होता है, अनेक विद्याओं के दोष रहित गद्य (श्लोक इत्यादि) लिखने पढ़ने में सदा अभ्यास (प्रेम) रखता है और धनी भी होता है ॥ ८ ॥

शस्ते विशेषाद्विदुषां प्रशस्तः
प्रशस्तवेषो गतरोगसंघः ।
विशालमालालसितोऽमलोक्त्या
नरो नराणामधिपः प्रधानः ॥ ९ ॥

अन्वयः-शस्ते नरः विशेषाद्विदुषां प्रशस्तः, विशस्तवेषः, गतरोग संघः, विशालमालालसितः, अमलोक्त्या नराणामधिप, प्रधानः (च भवति) ॥ ९ ॥

भा०—शस्त अवस्था वाले ग्रहकी दशामें मनुष्य विशेषतः विद्वानोंसे आदर पाता है, सुन्दर शरीर वाला, रोग हीन होता है, बहुमूल्य मणियों (हीरा पन्ना इत्यादि) की मालासे विभूपित होता है अपने मनोहर वाणी (युक्ति युक्त वचनों) से मनुष्यों का राजा अथवा वन जाता है ॥ ९ ॥

लुप्ते च लुप्तो गुणधर्मभावैः
प्रपीडितोऽरातिकुलेन मर्त्यः
भवेद्विरक्तो गदजालयुक्तो
प्रमादशाली खलु पापमाली ॥ १० ॥

अन्वयः -लुप्ते (ग्रहे तदा) मर्त्यः गुणधर्मभावैः लुप्तः, अराति-कुलेन प्रपीडितः, विरक्तः, गदजालयुक्तः, प्रमादशाली खलु पापमाली भवेत् ॥ १० ॥

भा०--लुप्त अवस्थागत ग्रहदशा में मनुष्य गुण और अपने धर्म कर्म से हीन हो जाता है, शत्रुओंके आक्रमणसे अत्यन्त दुखी होता है, परिवार तथा सम्पत्तिसे अलग रहता है, सदा रोगी रहता है और प्रमादसे भरा हुआ अत्यन्त पापी होता है ॥ १० ॥

दीनेऽतिदीनो मतितोषहीनो
जनो जनेशादिनिपीडितश्च ।
गुणेन हीनः परदाररक्तः
परार्थहारी च कुभूमिचारी ॥ ११ ॥

अन्वयः—दीने (ग्रहे तदा) जनः अतिदीनः मतितोषहीनः, जनेशादिनिपीडितः, गुणेन हीनश्च, परदाररलीनः, परार्थहारी, कुभूमिचारी च (भवति) ॥ ११ ॥

भा०-दीन ग्रह यदि जन्मकाल में हों तो वह मनुष्य अत्यन्त गरीब, बुद्धि और सन्तोष से हीन होता है, राजा अथवा मन्त्री इत्यादि से कष्ट पाता है, मूर्ख तथा पराई स्त्री से प्रेम करने वाला दूसरे के द्रव्य को हरण करने वाला और श्मशानादि कुत्सित भूमि में निवास करने वाला होता है ॥ ११ ॥

पीडिते गदनिपीडितः सदा
चिन्तया च परया समन्वितः ।
व्यग्रितो बहुमदोद्धतः पुमा-
नाधिरोगसहितो विशेषतः ॥१२॥

अन्वयः–निपीडिते (तदा पुनाम्) सदा गदनिपीडितः, परया चिन्तया च समन्वितः, व्यग्रितः, बहुमदोद्धतः (तथा) विशेषतः अधिरोग सहितः (स्यात्) ॥ १२ ॥

भा०--जन्मकालमें यदि निपीड़ित ग्रह हो तो वह मनुष्य सर्वदा रोग से दुःखी रहता है, दूसरे चिन्ता से चिन्तित रहता है, सदा व्यग्र, मदान्ध और विशेषतः मानसिक दुःखों से सन्तप्त रहता है ॥ १२ ॥

इति श्री भावकुतूहले उत्साहवर्द्धिनी सान्वयः भाषाटीकायां ग्रहावस्थाफलकथनं त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

अथ मारकग्रह विचारः—

शनेः मारकत्वनिरूपणम्

मारकग्रहसम्बन्धात् पापकर्त्ता शनिस्तदा ।
तिरस्कृत्य ग्रहान्सर्वान्निहंता भवति ध्रुवम् ॥ १ ॥

अन्वयः—पापकर्ता शनिः मारकग्रहसम्बन्धात् सर्वान् ग्रहान् तिरस्कृत्य तदा ध्रुवं निहन्ता भवति ॥ १ ॥

भा०—अब मारकेश ग्रहों का विचार करते हुए कहते हैं कि यमराज के निकट रहनेवाले शनि यदि मारकेश ग्रहों के साथ चारों प्रकार के सम्बन्धों में किसी प्रकार का सम्बन्ध करता हो अथवा स्वयं मारकेश हो तो अन्य मारकेश ग्रहों की अपेक्षा प्रबल मारकेश होता है ॥ १ ॥

भवनाधिपानां शुभाशुभ संज्ञा--

त्रिकोणभवनाधिपाः शुभफलास्तु सर्वे ग्रहा-
स्त्रिवैरिभवभावपाः खलफला निरुक्ता बुधैः ।
भवन्ति यदि केन्द्रपाः शुभखगा न शस्ता नृणा-
मतीवशुभदायकाः खलखचारिणो जन्मनि ॥ २ ॥

अन्वय—जन्मनि सर्वे ग्रहाः त्रिकोणभवनाधिपाः (तदा) शुभफलाः, त्रिवैरिभवभावपाः (तदा) खलफलाः बुधैः निरुक्ता, यदि शुभखगाः केन्द्रपाः (तदा) नृणां न शस्ता भवन्ति, यदि खलखचारिणः केन्द्रपाः (तदा) अतीव शुभदायकाः भवन्ति ॥ २ ॥

भा०—जन्म समय में सूर्यादि ग्रह त्रिकोण (५, ९) घर के स्वामी हों तो शुभ फल करनेवाले होते हैं, तीसरे, छठें और ग्यारहवें घर के स्वामी जो ग्रह होते हैं वे पापी कहलाते हैं अर्थात् अपने दशान्तर्दशा में अनिष्ट फल करते हैं ऐसा पण्डितों ने कहा है, यदि शुभ ग्रह (पूर्णचन्द्र, बुध, गुरु, शुक्र हैं,) केन्द्र (१; ४, ७, १०) के स्वामी हों तो मनुष्यों को शुभ फल नहीं देते, यदि पाप ग्रह केन्द्र के स्वामी हों तो अपनी दशा विदशा में अत्यन्त शुभ फल देने वाले होते हैं ॥ २ ॥

यद्यद्भावगतो राहुः केतुश्च जनने नृणाम् ।
यद्यद्भावेशसंयुक्तस्तत्फलं प्रदिशेदलम् ॥ ३ ॥

अन्वयः--जनने राहुः केतुश्च यद्यद्भाव गतः (तदा) यद्यद्भावेशसंयुतः तत्फलं नृणां अलं प्रदिशेत् ॥ ३ ॥

भा०—जन्मकाल में राहु और केतु जिस २ भाव में बैठे हों अथवा जिस २ भाव के स्वामी के साथ सम्बन्ध करते हों उस भाव का फल मनुष्यों को पर्याप्त देते हैं ॥ ३ ॥

मन्दश्चेत्पापसंयुक्तो मारकग्रहयोगतः ।
तिरस्कृत्य ग्रहान्सर्वान्निहन्ता पापकृद्यदा ॥ ४ ॥

अन्वयः—यदा पापकृत् मन्दः पापसंयुक्तः मारकग्रहयोगतः सर्वान् ग्रहान् तिरस्कृत्य निहन्ता (भवति) ॥ ४ ॥

भा०—यदि पापी शनैश्चर पाप ग्रहों के साथ होकर मारक ग्रहों (द्वितीयेश, सप्तमेश, अष्टमेश इत्यादि) से सम्बन्ध करता हो तो अन्य सब मारकेशों को हटा कर प्रबल मारकेश स्वयं हो जाता है ॥ ४ ॥

अल्प-मध्यम-पूर्णायुः प्रमाणमिह योगजम् ।
विज्ञाय प्रथमं पुंसां ततो मारकचिन्तना ॥ ५ ॥

अन्वयः—प्रथमं पुंसां योगजं अल्प-मध्यम-पूर्णायुः प्रमाणमिह (वक्ष्यमाणतः) विज्ञाय ततः मारक चिन्तना (कार्या) ॥ ५ ॥

भा०—पहले मनुष्यों का योगज अर्थात् अल्पायु-मध्यमायु-पूर्णायु (दीर्घायु) प्रमाण युक्त विचार करने के बाद मारक ग्रहों का विचार करना चाहिये; जैसे मध्यमायु अथवा दीर्घायु निश्चय होने के अन्दर ही मारकेश ग्रहोंकी दशान्तर्दशा आ जाय तो विशेष कष्टातिरिक्त प्राणघातक नहीं होते, आयु खण्ड पूर्ति होने के समय जिस किसी भी मारकेश के दशान्तर्दशा में पञ्चत्व प्राप्त हो जाता है, अतः सबसे प्रथम आयु का विचार करना अत्यावश्यक है। चारो युग में पूर्णायु १०० वर्ष कही गई है यथा वेद में भी लिखा ("शतायु वै पुरुषः ।" त्रेता युग में श्रीरामचन्द्र के लिये वाल्मीकि ने जो लिखा है कि "दशवर्षसहस्राणि दशवर्षशतानि चेत्यादि, वह ठीक लिखा है पहले समय स्थान से गुणित अंक लिखा जाता था जैसे एक स्थानीय = १, दशस्थानीय=२, शत=३, सहस्र=४, अयुत्=५, इत्यादि, अतः १०×४+१०×३=४०+३०=७० वर्ष; अर्थात् ७० वर्ष ही पृथ्वी में श्रीरामचन्द्र ने राज्य कर साकेतपुर को पधारा। किन्तु ज्योतिष शास्त्रज्ञों ने १२० वर्ष पूर्णायु बताया है। आयु का तीन विभाग है, जन्म से ४० वर्ष तक अल्पायु, इसके बाद ८० वर्ष तक मध्यमायु और ८० वर्ष के बाद १२० वर्ष तक दीर्घायु कही गई है ॥ ५ ॥

अथ योगजायुर्दायविचारः—

चेदङ्गपो यदि रवेररिरेव हीनं
पूर्णं सुहृद्यदि समः सममायुराहुः ।
बालग्रहो हितसमारिपदेऽपि पूर्णं
मध्यं च हीनमिह जातकतत्त्वविज्ञाः ॥ ६ ॥

अन्वयः—यदि चेत् अङ्गपः रवेः अरिः (तदा) हीनं, सुहृद (तदा) पूर्णं, समः (तदा) सममायुः, (एवं) बाल ग्रह हितसमारिपदेऽपि पूर्णं, मध्यं हीनं च जातकत्वाविज्ञाः इहायुः आहुः ॥६॥

भा०--जन्म कालमें यदि लग्नेश सूर्यका शत्रु हो तो उस बालककी हीनायु (४० वर्ष के भीतर) होती है, यदि लग्नेश रविका मित्र हो तो दीर्घायु (८० वर्ष के ऊपर और १२० वर्ष से नीचे), यदि लग्नेश रविका सम हो तो मध्यमायु (४० वर्ष से अधिक और ८० वर्ष के अन्दर आयु) होती है। इसी प्रकार लग्नेश अपने मित्र, सम, शत्रु घर में बैठा हो तो बालक की दीर्घायु, मध्यमायु और हीनायु क्रमसे होती है ऐसी ज्योतिष शास्त्रज्ञों की सम्मति है ॥ ६ ॥

आयुस्थानमारकस्थानकथनम्—

अष्टमर्क्षं च तृतीयं बुधैरायुरुदाहृतम् ।
द्वितीयं सप्तमं स्थानं मारकस्थानमुच्यते ॥ ७ ॥

अन्वयः—अष्टमर्क्षं तृतीयं च बुधैः आयुः-उदाहृतं, द्वितीयं, सप्तमं स्थानं मारकस्थानं—उच्यते ॥ ७ ॥

भा०—जन्म लग्न से तीसरा और आठवाँ आयु स्थान, दूसरा और सातवाँ मारक स्थान कहा गया है ॥ ७ ॥

अथ मृत्युकालयोगः—

मारकेशदशापाके मारकस्थस्य पापिनः ।
पाके पापयुजां पाके संभवे निधनं विशेत् ॥ ८ ॥

अन्वयः—(आयुखण्डप्राप्ते) मारकेश दशायां मारकस्थस्य पाके (अथवा) पापिनः पाके पापयुजां पाके निधन सम्भवं विशेत् ॥ ८ ॥

भा०--आयु खण्ड पूर्तिकाल में मारकेश ग्रह के दशा में और मारक स्थान में बैठे हुए पापग्रह (त्रिषडायेश) के अन्तर में मृत्यु सम्भव अथवा पापग्रहों की दशा में और पापग्रह से योग (सम्बन्ध) करने वाले ग्रहों के अन्तर में भी मृत्यु का सम्भव होता है ॥ ८ ॥

असंभवे व्ययाधीशदशायां मरणं नृणाम् ।
अभावे व्ययभावेशसम्बन्धिग्रहभुक्तिषु ॥ ९ ॥

अन्वयः—(पूर्वमारकेशाणां) असम्भवे तदा) व्ययाधीश-दशायां, [अस्य] अभावे व्ययभावेशसम्बन्धिग्रहभुक्तिषु नृणां मरणं (वाच्यम्) ॥ ९ ॥

भा०—आयु खण्ड पूर्तिकाल में पहले कहे हुये मारकेशों के दशा अन्तर्दशा न हो तो लग्न से बारहवें घर के स्वामी के दशा वा अन्तर्दशा में मरण कहना चाहिये, इसके अभाव में द्वादशेश से सम्बन्ध करने वाले ग्रहों के दशा अन्तर्दशा काल में मृत्यु कहनी चाहिये ॥ ९ ॥

तदभावेऽष्टमेशस्य दशायां निधनं पुनः ।
दुष्टतारापतेः पाके निर्याणं कथितं बुधैः ॥ १० ॥

अन्वयः—तदभावेऽष्टमेशस्य दशायां, पुनः दुष्टतारापतेः पाके बुधैः निर्याणं कथितम् ॥ १० ॥

भा०—द्वादशेश ग्रह से सम्बन्ध करने वाले ग्रहों के अभाव में अष्टमेश के दशान्तर्दशा में मरण कहना चाहिये, इसके भी अभाव में जन्म नक्षत्र से ३, ५, ७ वीं तारा जब आवे उस नक्षत्र के राशि के स्वामी के दशा-अन्तर्दशा में मृत्यु कहनी चाहिये अथवा प्रथम आवृत्ति का वध तारा जब आवे उस राशि के चन्द्रमा में अवश्य मृत्यु होती है ऐसा पण्डितों ने कहा है । १० ॥

अथ राजयोगाः—

नवमभावपतिस्तनयालये
सुतपतिर्नवमे यदि जन्मिनः ।
अतिविचित्रमणिव्रजमण्डितो
वसुमती विभुतां स नरो व्रजेत् ॥ ११

अन्वयः—यदि जन्मिनः नवमभावपतिस्तनयालये, (तथा सुत-पतिः नवमे (तदा) स नरः अतिविचित्रमणिव्रजमण्डितः (तथा) वसु-मती विभुतां व्रजेत् ॥ ११ ॥

भा०-यदि जन्मकाल में नवें घर का स्वामी पाँचवें घर में बैठा हो और पाँचवें घर का स्वामी नवें घर में बैठा हो तो वह मनुष्य अत्यन्त सुन्दर (बहु-मूल्य) रत्नों से युक्त पृथ्वी का राजा होता है ॥ ११ ॥

कर्माधीशः सुतस्थाने सुतेशः कर्मगो यदा ।
त्रिकोणपतिना दृष्टा राजा भवति निश्चितम् ॥१२॥

अन्वयः—यदा कर्माधीशः सुतस्थाने, सुतेशः कर्मगः (तथा) त्रिकोणपतिना दृष्टः (तदा) निश्चितं राजा भवति ॥ १२ ॥

भा०--जिसके जन्मकालमें दशमेश पाँचवें घरमें बैठा हो और पञ्चमेश दसवें घरमें बैठा हो, और दोनों नवमेश करके देखे जाते हों तो वह मनुष्य अवश्य राजा होता है ॥ १२ ॥

राज्येशाङ्गपवाहनेशसुतपा धर्मालये स्वामिना
संयुक्ता यदि वीक्षिताश्च बलिनो राजा भवेन्मानवः ।
पुत्रेशो यदि धर्मपेन सहितो लग्नाधिपेनाङ्गगो
दृष्टो वा सहितःसुखेऽपि दशमे राजा भवेन्निश्चितम् ॥१३॥

अन्वयः–यदि राज्येशाङ्गपवाहनेशसुतपाः बलिनः धर्मालये स्वामिना संयुक्ताः वीक्षिताश्च (तदा) मानवः राजा भवेत् । (अथवा) पुत्रेशः यदि धर्मपेन वा लग्नाधिपेन सहितः वा दृष्टः अङ्गगः (अथवा) धर्मपेन सहितः दृष्टः सुखे, दशमेऽपिगः (तदा) निश्चितं राजा भवेत् । १३ ॥

भा०—यदि दशमेश, लग्नेश, चतुर्थेश, और पञ्चमेश बलवान हों और नवमेश के साथ हों अथवा नवमेश से देखे जाते हों तो वह मनुष्य निश्चय करके राजा होता है । अथवा यदि पञ्चमेश, नवमेश वा लग्नेश के साथ देखा जाता हुआ तनु भाव में बैठा हो, अथवा लग्नेश नवमेश के साथ २ वा नवमेश से देखा जाता हुआ चौथे वा दशवें घर में बैठा हो तो भी वह मनुष्य अवश्य राजा होता है ॥ १३ ॥

यत्र कुत्रापि केन्द्रेशस्त्रिकोणपतिना युतः ।
सबलो मनुजो राजा दुर्बलो धनपो भवेत् ॥ १४ ॥

अन्वयः—सबलः केन्द्रेश त्रिकोणपतिना युतः यत्रकुत्रापि (गतः) (तदा) मनुजः राजा भवेत्, (यदि) दुर्बलः (तदा) धनपः भवेत् ॥१४॥

भा०—यदि बलवान् केन्द्रेश (दशमेश) नवमेश अथवा पञ्चमेश के साथ २ कहीं भी बैठा हो तो वह मनुष्य राजा होता है, यदि लग्नेश, सुखेश अथवा सप्तमेश के साथ २ त्रिकोणेश बैठा हो तो भी वह मनुष्य बहुत बड़ा धनवान् (खिताबी राजा) होता है ॥ १४ ॥

पुण्यस्थाने गुरुक्षेत्रे दशमे भृगुणा युते ।
पंचमस्वामिना दृष्टे राजपुत्रो नराधिपः ॥ १५ ॥

अन्वयः-भृगुणा युते (केन्द्रशः) पुण्यस्थाने गुरु क्षेत्रे (वा) पञ्चम-स्वामिना दृष्टे (गतस्तदा) राजपुत्रः नराधिपः (भवेत्) ॥ १५ ॥

भा०—शुक्र के साथ २ केन्द्र स्थान (१, ४, ७, १०) का स्वामी नवें घर में वृहस्पति के क्षेत्र (९, १२) में अथवा दसवें घर में वृहस्पति के क्षेत्र का बैठा हो और पञ्चमेश से देखा जाता हो तो राज्य कुलमें उत्पन्न हुआ मनुष्य अवश्य राजा होता है ॥ १५ ॥

अथ धनाढ्ययोगः—

पंचमे निजभे शुक्रे लाभे रविसुते यदा।
भोक्ता मणिसुवर्णानामधिपो जायते नृणाम् ॥१६॥

अन्वयः—यदा नृणां (जन्मकाले) निजभे शुक्रे पञ्चमे (तथा) रविसुते लाभ [तदा] भोक्ता मणिसुवर्णानामधिपः जायते ॥ १६ ॥

भा०—यदि मनुष्य के जन्मकाल में अपने राशि (७, २) का होकर शुक्र पाँचवें घरमें बैठा हो और शनैश्चर ग्यारहवें घर में बैठा हो तो वह मनुष्य सब पदार्थोंका भोगनेवाला हीरा, पन्ना इत्यादि रत्नोंसे युक्त बहुत ही बड़ा धनवान् होता है ॥ १६ ॥

कर्कटे तु कलानाथे पंचमे लाभगे शनौ।
नानाधनसंमृद्धिः स्याद्धर्मवृद्धिश्च भूपतिः ॥ १७ ॥

अन्वयः—(यदा) कर्कटे कलानाथे तु पञ्चमे, लाभगे शनौ (तदा) नानाधनसमृद्धिः स्यात्, धर्मवृद्धिः, (तथा) भूपतिः (भवेत्) ॥ १७ ॥

भा०—यदि कर्कराशिमें चन्द्रमा बैठा हो और पांचवें वा ग्यारहवें घरमें शनि बैठा हो तो वह मनुष्य अनेक तरहकी सम्पत्तियोंको पैदा कर अपने धर्म कर्म से युक्त रह कर राजा की तरह सुख करता है ॥१७॥

पंचमे तु मृगे कुंभे समन्दे यस्य जन्मनि।
बुधे लाभालये तस्य सर्वतो द्रविणोन्नतिः ॥ १८ ॥

अन्वयः—यस्य जन्मनि पञ्चमे मृगे कुम्भे स मन्दे तु बुधे लाभालये, तस्य सर्वतः द्रविणोन्नति भवेत् ॥ १८ ॥

भा०—जिसके जन्मकालमें लग्नसे पाँचवें घरमें मकर अथवा कुम्भ राशि का होकर शनि बैठा हो और बुध ग्यारहवें घर में बैठा हो तो उस मनुष्य को चारों तरफ से धन की वृद्धि होती है अर्थात् कोट्यधीश होता है ॥ १८ ॥

पञ्चमे तु रवौ सिंहे लाभे देवगुरौ सदा ।
वाहनस्वर्णरत्नानामधिपो जायते क्षणात् ॥ १६ ॥

अन्वयः—(यदा) रवौ सिंहे पञ्चमे तु देवगुरौ लाभे (तदा) क्षणात् सदा वाहनस्वर्णरत्नानामधिपो जायते ॥ १९ ॥

भा०—यदि सूर्य सिंह राशिका होकर पाँचवें घर में बैठा हो और बृहस्पति ग्यारहवें घर में बैठा हो तो वह मनुष्य बाल्यावस्था से ही वाहन, सुवर्ण और बहुमूल्य रत्नादिकों का मालिक हो जाता है ॥ १६ ॥

पञ्चमे तु गुरुक्षेत्रे सगुरौ यदि जन्मनि ।
लाभगाविन्दुभूपुत्रौ पृथ्वीपतिसमो नरः ॥ २० ॥

अन्वयः—यदि जन्मनि गुरुक्षेत्रे सगुरौ पञ्चमे, तु-इन्दुभूपुत्रौ लाभगौ (तदा) नरः पृथ्वीपति समः जायते ॥ २० ॥

भा०—जिसके जन्मकालमें अपनी राशि (९, १२) का होकर बृहस्पति पाँचवें घरमें बैठा हो और चन्द्रमा तथा मङ्गल ग्यारहवें घरमें बैठे हों तो वह मनुष्य राजाके समान धनी होता है ॥ २० ॥

रविक्षेत्रगते लग्ने रविणा संयुते सति ।
गुरुभौमयुते वापि धनाधिक्यं दिने दिने ॥ २१ ॥

अन्वयः—लग्ने रविक्षेत्रगते रविणा सयुते सति गुरुभौमयुते वापि (तदा) दिने दिने धनाधिक्यं (जायते) ॥ २१ ॥

भा०—जिसके जन्मलग्न में सिंह लग्न हो और सूर्य वहीं बैठा हो अथवा बृहस्पति मङ्गलके साथ सूर्य लग्नमें बैठा हो तो दिनों दिन उस मनुष्य का धन बढ़ता है ॥ २१ ॥

कर्कभे जन्मलग्ने तु सचन्द्रे यदि जन्मनि ।
संयुते जीवभौमाभ्यां स सद्यो वित्तपो भवेत् ॥ २२ ॥

अन्वयः—यदि जन्मनि जन्मलग्ने कर्कभे सचन्द्रे तु जीवभौमाभ्यां संयुते (तदा) स सद्यः वित्तपः भवेत् ॥ २२ ॥

भा०—जिसके जन्मकाल में कर्कलग्न हो चन्द्रमा लग्न ही में बैठा हो और बृहस्पति मङ्गल के साथ हो तो वह मनुष्य अति शीघ्र धनाढ्य हो जाता है ॥२२॥

कुजक्षेत्रगते लग्ने सभौमे यस्य जन्मनि।
ज्ञशुक्रमन्दसंयुक्ते स धनेशसमो नरः ॥ २३ ॥

अन्वयः—यस्य जन्मनि कुजक्षेत्रगते लग्ने सभौमे, ज्ञशुक्रमन्द-संयुक्ते (तदा) स नरः धनेशसमः भवति ॥ २३ ॥

भा०—जिसके जन्मकाल में मेष अथवा वृश्चिक लग्न हो मङ्गल वहाँ ही बुध, शुक्र शनि के साथ २ बैठा हो तो वह मनुष्य कुबेर के समान धनवान् होता है ॥ २३ ॥

अचललक्ष्मीयोगः--

गुरुभे गुरुसंयुक्ते जन्मलग्नगते सति।
चन्द्राङ्गारयुतो यस्य तस्य लक्ष्मीरचञ्चला ॥ २४ ॥

अन्वयः-यस्य गुरुभे गुरु संयुक्ते जन्मलग्नगते सति (तथा) चन्द्राङ्गारयुते (तदा) तस्य लक्ष्मीरचञ्चला (भवति) ॥ २४ ॥

भा०—जिसके जन्मकाल में धन अथवा मीन लग्न गत वृहस्पति जन्मलग्न में हो और चन्द्रमा, मङ्गल, भी वहाँ ही बैठे हों तो उस मनुष्य की लक्ष्मी अचला (चिरकाल रहने वाली) होती है ॥ २४ ॥

कन्यामिथुनयोर्लग्ने सबुधे यस्य जन्मनि।
संयुते शुक्रमन्दाभ्यां दृष्टे वा धनिको भवेत् ॥ २५ ॥

अन्वयः—यस्य जन्मनि कन्या मिथुनयोः लग्ने सबुधे शुक्रमन्दाभ्यां संयुते वा दृष्टे (तदा) धनिको भवेत् ॥ २५ ॥

भा०--जिसके जन्मकाल में कन्या अथवा मिथुन लग्न हो बुध वहीं बैठा हो और शुक्र शनि से लग्न देखा जाता हो अथवा शुक्र शनि वहाँ बैठे हों तो मनुष्य धनवान् होता है ॥ २५ ॥

शुक्रराशिगते लग्ने ससिते यदि जन्मनि।
चन्द्रजादित्यजाभ्यां तु युते दृष्टे धनाधिपः ॥ २६ ॥

अन्वयः--यदि जन्मनि ससिते शुक्रराशिगते लग्ने, तु चन्द्रजादित्यजाभ्यां युते दृष्टे (तदा) धनाधिपः ॥ २६ ॥

भा०—जिसके जन्मकाल में शुक्रके साथ बुध अथवा तुलालग्न हो और वह लग्न बुध शनि से दृष्ट वा युक्त हो तो वह मनुष्य धनाढ्य होता है ॥२६॥

अथ दरिद्रयोगाः—

त्रिकोणपतिसम्बन्धी यो यो वित्तप्रदो ग्रहः ।
स षडष्टव्ययाधीशैर्युतो धनविनाशकः ॥ २७ ॥

अन्वयः--त्रिकोणपतिसम्बन्धी यो यो वित्तप्रदः ग्रहः स (यदि) षडष्टव्ययाधीशैर्युतः (तदा) धनविनाशकः स्यात्) ॥ २७ ॥

भा०—पञ्चमेश, नवमेश से सम्बन्ध करने वाले जो धन देने वाले ग्रह (केन्द्रेश) हैं वे यदि षष्ठेश, अष्टमेश और द्वादमेश के साथ २ हों तो धन नाश करने वाले हो जाते हैं ॥ २७ ॥

लग्नगे निधनाधीशे निधने लग्नपे यदि ।
मारकग्रहसंयुक्ते जातो भवति निर्धनः ॥ २८ ॥

अन्वयः--यदि मारकग्रहसंयुक्ते निधनाधीशे लग्नगे, (तथा) लग्नपे निधने गते तदा) जातः निर्धनः भवति ॥ २८ ॥

भा०--यदि मारक ग्रहके साथ २ आठवें घर का स्वामी लग्नमें बैठा हो और लग्नेश आठवें घर में बैठा हो तो मनुष्य दरिद्र होता है ॥ २८ ॥

रिपुभावपतौ लग्ने लग्नेशे रिपुभावगे ।
मारकस्वामिना दृष्टे युते वा निर्द्धनो भवेत् ॥ २६ ॥

अन्वयः—रिपु भावपतौ लग्ने, लग्नेशे रिपुभावगे, मारक स्वामिना दृष्टे वा युते (तदा नरः) निर्धनो भवेत् ॥ २९ ॥

भा०—जिसके जन्म समयमें छठवें घरका स्वामी लग्नमें बैठा हो, लग्नेश छठें घर में बैठा हो और दोनों ग्रह अष्टमेश से युक्त अथवा देखे जाते हों तो वह मनुष्य दरिद्र हो जाता है ॥ २६ ॥

चन्द्रादित्यौ यदा लग्ने वाङ्गपे निधनालये ।
मारकेण युते दृष्टे नरो भवति निर्धनः ॥ ३० ॥

अन्वयः--यदा चन्द्रादित्यौ लग्ने वा अङ्गपे निधनालये (तथा) मारकेण युते दृष्टे (तदा) नरः निर्धनः भवति ॥ ३० ॥

भा०—यदि चन्द्रमा और सूर्य लग्नमें बैठे हों अथवा लग्नेश आठवें घरमें बैठा हो और मारकेश ग्रहोंसे युत दृष्टहो तो वह मनुष्य निर्धन (दरिद्र) हो जाताहै॥३०॥

ऋणीयोगः--

यदाङ्गनाथस्त्रिकभावनाथै-
र्युतेक्षितः पापयुतोऽथवा स्यात् ।
पुत्रेश्वरेणापि युते विलग्ने
शुभैरदृष्टे च भवेदृणी सः ॥ ३१ ॥

अन्वयः--यदाङ्गनाथ, त्रिकभावनाथैर्युतेक्षितः अथवा पापयुतः शुभैरदृष्टे च स्यात् [तदा] पुत्रेश्वरेणापि युते विलग्ने सः (नरः) ऋणी भवेत् ॥ ३१ ॥

भा०—यदि लग्नेश त्रिक (६, ८, १२) स्थान के स्वामी के साथ हो तथा त्रिकेशसे देखा जाता हो, अथवा पापग्रहों के साथ हो और उसको शुभग्रह न देखते हों तो पञ्चमेश से योग करके धन देने वाला भी लग्नेश हो तो भी वह मनुष्य ऋणी होता है ॥ ३१ ॥

अस्तारिनीचत्रिकभावगे वा
लग्नेश्वरे मारकनाथयुक्ते ।
भाग्याधिपे वाथशुभैरदृष्टे
भवेदृणीशो मनुजेश्वरोऽपि ॥ ३२ ॥

अन्वयः—(यदा) मारकनाथयुक्ते भाग्याधिपे अथवा शुभैरदृष्टे लग्नेश्वरे अस्तारिनीचत्रिकभावगे वा (तदा) मनुजेश्वरोऽपि ऋणीशो भवेत् ॥ ३२ ॥

भा०—यदि मारकेश ग्रहों के साथ हो और नवनमेश तथा शुभग्रहों से न देखा जाता हो ऐसा लग्नेश अस्त हो, शत्रु की राशि का हो, नीच राशि में अथवा त्रिक (६, ८, १२) स्थान में बैठा हो तो राजकुल में उत्पन्न हुआ भी मनुष्य बहुत बड़ा कर्जदार हो जाता है ॥ ३२ ॥

इति श्री भावकुतूहले-उत्साहवर्द्धिनी सान्वयभाषाटीकायां विविधयोग-कथननाम चतुर्दशोऽध्यायः ।

——:०:——

पञ्चदशोऽध्यायः

अथ भावानां विचारः—

तत्रादौ तनुभावविचारः—

अष्टारिव्ययगो यस्य लग्नस्वामी खलैर्युतः।
सुखं निहन्ति तस्याशु सर्वभावेष्वयं विधिः ॥ १ ॥

अन्वयः—यस्य लग्नस्वामी खलैर्युतः अष्टारिव्ययगः, तत्सुखं आशु निहन्ति, अयं विधिः सर्वभावेषु भवन्ति ॥ १ ॥

भा०—जिसके जन्मकाल में लग्नेश पापग्रहों के साथ आठवें, छठें अथवा बारहवें घर में बैठा हो तो उस मनुष्य का शरीर सुख शीघ्र नष्ट हो जाता है; इसी प्रकार सब भावों का फल विचार करना चाहिये ॥ १ ॥

लग्नपश्चन्द्रराशिशो नीचस्तु रिपुराशिगः।
विना स्वर्क्षं त्रिकस्थश्चेद्बलहीनो ग्रहो भवेत् ॥ २ ॥

अन्वयः—(यदा) लग्नपः चन्द्रराशीशः ग्रहः नीचः रिपुराशिगः (तथा) विना स्वर्क्षं त्रिकस्थश्चेत् (तदा) बलहीनः भवेत् ॥ २ ॥

भा०—यदि लग्नेश और चन्द्रस्थित राशि का स्वामी नीच स्थान में बैठा हो, शत्रु की राशि में बैठा हो अथवा अपने घर बिना त्रिक (६, ८, १२) स्थान में बैठा हो तो वह ग्रह दुर्बल जाता है अर्थात् शुभाशुभ फल करने में असमर्थ हो जाता है ॥ २ ॥

दुष्टस्थानगते यस्य चन्द्रलग्नेश्वरे यदि।
कार्श्यं गदभयं नित्यं वितनोति रिपूदयम् ॥ ३ ॥

अन्वयः—यस्य चन्द्रलग्नेश्वरे यदि दुष्टस्थान गते (तदा तस्य) नित्यं कार्श्यं गदभयं [तथा] रिपूदयं वितनोति ॥ ३ ॥

भा०—जिस मनुष्य के जन्म समय में चन्द्रराशि का स्वामी और लग्नेश यदि छठें, आठवें, बारहवें अपने नीच स्थान अथवा अस्त होकर बैठे हों तो वह मनुष्य सर्वदा रोग से पीड़ित रहता है और शत्रु समहों को बढ़ाता है ॥ ३ ॥

निजोच्चे निजभे वर्गे स्वकीये लग्नपे यदि।
दीर्घायुः सुखसंतुप्तो बली भोगी प्रजायते ॥ ४ ॥

अन्वयः—यदि लग्नपे निजोच्चे, निजभे [तथा] स्वकीये वर्गे [तदा] दीर्घायुः, सुखसंतृप्तः, बली, भोगी प्रजायते ॥ ४ ॥

भा०—यदि लग्न का स्वामी अपने उच्च स्थान में, अपने घर में अथवा अपने षडवर्ग में बैठा हो तो वह मनुष्य बहुत काल तक जीनेवाला, सब सुखों से युक्त, बलवान् और सब भोगों को पर्याप्त भोगने वाला होता है ॥ ४ ॥

अथ धनभावविचारः—

धनेशः शुक्रसंयुक्तोऽथवा शुक्रात्त्रिके भवेत् ।
सम्बन्धी लग्ननाथेन नेत्रयोः पीडनं भवेत् ॥ ५ ॥

अन्वयः—धनेशः शुक्रसंयुक्तो अथवा शुक्रात्त्रिके [तथा] लग्ननाथेन सम्बन्धी भवेत् [तदा] नेत्रयोः पीड़नं भवेत् ॥ ५ ॥

भा०—जिसके जन्म समय में दूसरे घरका स्वामी शुक्र के साथ हो अथवा शुक्र से त्रिक (६, ८, १२) स्थान में बैठा हो और लग्नेश से सम्बन्ध करता हो तो उसके आँखों में कष्ट होता है ॥ ५ ॥

चन्द्रादित्यौ धने स्यातां निशान्धो मनुजो भवेत् ।
अर्कलग्नपकोशेशाः सुखाधिपतिना युताः ॥ ६ ॥
मात्रादीनां प्रकुर्वन्ति मन्दतां नेत्रयोरपि ।
उच्चगो निजगेहस्थो ग्रहो नैवात्रदोषकृत् ॥ ७ ॥

अन्वयः—[यदि] धने चन्द्रादित्यौ स्यातां [तदा] मनुजः निशान्धः भवेत् [अथ च अर्कलग्नपकोशेशाः सुखाधिपतिना युताः [तदा] मात्रादीनामपि नेत्रयोः मन्दतां प्रकुर्वन्ति [यदोक्तः] ग्रहः उच्चगः, निजगृहस्थः [तदा] अत्र दोषकृन् नैव [भवति] ॥ ६-७ ॥

भा०—यदि दूसरे घर में चंद्रमा और सूर्य बैठे हों तो वह मनुष्य रात्र्यन्ध होता है, यदि सूर्य, लग्नेश और धनेश ये तीनों ग्रह चौथे घर के स्वामी के साथ बैठे हों तो उस मनुष्य के माता पितादिकों के नेत्र ज्योति कम कर देते हैं, यदि उक्त ग्रह उच्च स्थान तथा अपने घर में बैठे हों तो नेत्र ज्योति कम नहीं करते अर्थात् आजन्म नेत्रज्योति प्रकाशित रहती है ॥ ६-७ ॥

गुरुवागभवनाधीशौ त्रिकस्थानगतौ यदाः ।
मूकतां कुरुतोऽप्येवं पितृमातृगृहेश्वरः ॥ ८ ॥

ताभ्यां युतस्त्रिकस्थाने तेषां मूकत्वमादिशेत्।
बलाबलविवेकेन जातज्ञैर्विशेषतः ॥ ९ ॥

अन्वयः-यदा गुरुवाग्भवनाधीशौ त्रिकस्थान गतौ (तदा) मूकतां कुरुतः, एवं पितृमातृगृहेश्वरः ताभ्यां (गुरुवाग्भवनाधीशाभ्यां) युतस्त्रिकस्थाने (गतस्तदा) तेषां मूकत्वं आदिशेत, जातकज्ञैः विशेषतः बलाबलविवेकेन (फलम्) आदिशेत् ॥ ८-९ ॥

भा०—यदि बृहस्पति और पाँचवें घर का स्वामी जन्मलग्न से त्रिक (६; ८; १२) स्थान में बैठा हो तो मनुष्य को गूँगा बनाते हैं, इसी तरह बृहस्पति से और पिता स्थान (दसवाँ घर) से पंचमेश त्रिक स्थानमें बैठे हों तो उसका पिता गूँगा होता है और बृहस्पति तथा मातागृह (चौथे घर) से पंचमेश यदि त्रिक स्थान में बैठे हों तो उसकी माता गूँगी होती है, इसी प्रकार पुत्र तथा स्त्री इत्यादिकों का विचार करना चाहिये जातक शास्त्र के जानने वालों को प्रायः ग्रहों के बल तथा निर्बल का विचार कर फल कहना चाहिये, अच्छा अथवा खराब फल करने वाले ग्रह बलवान् हों तो पूर्ण फल दुर्बल हों तो साधारण फल करते हैं ॥८-९॥

धनाधिपो माननवायभावे
बली यदा तिष्ठति जन्मकाले।
रमा विहारालयवासिनी वा
निजोच्चमित्रालयगो जनानाम् ॥१०॥

अन्वयः-- जन्मकाले बली धनाधिपः माननवायभावे यदि तिष्टति वा निजोच्चमित्रालयगः (तदा) जनानां विहारालयवासिनी रमा (भवति) ॥ १० ॥

भा०—जिसके जन्मकाल में बलवान् होकर दूसरे घर का स्वामी दसवें, नवें अथवा ग्यारहवें घर में बैठा हो अथवा अपने उच्च स्थान, मित्र गृह में बैठा हो तो उसके विहार करने वाले घर में श्रीलक्ष्मी निवास करती हैं अर्थात् वह मनुष्य अत्यन्त धनाढ्य होता है ॥ १० ॥

अथ तृतीयभावविचारः—

सहजे सहजाधीशे षडादित्रयगेऽपि वा।
सहजेऽपि विशेषेण भ्रातुः सौख्यं न जायते ॥११॥

अन्वयः—सहजाधीशे सहजे वा षडादित्रयगेऽपि (तदा) सहजेऽपि विशेषेण भ्रातुः सौख्यं न जायते ॥ ११ ॥

भा०—तीसरे घर का स्वामी तीसरे घर में अथवा छठें, सातवें, आठवें घर में बैठा हो तो भाइयों के रहते हुए भी उस मनुष्य को विशेष भ्रातृ सुख नहीं मिलता, अर्थात् विरोध रहा करता है ॥ ११ ॥

सहोत्थभावेशकुजौ सपापौ
पापालये वा भवतो जनस्य ।
उत्पाद्य सद्यो निहतः सहोत्था-
निंतीरितं जातकतत्त्वविज्ञैः ॥१२॥

अन्वयः—(यस्य) सहोत्थभावेशकुजौ सपापौ वा पापालये भवतः (तदा) जनस्य उत्पाद्य सहोत्थान् सद्यः निहतः इति जातकतत्त्वविज्ञैः इरितम् ॥ १२ ॥

भा०—जिसके जन्म समय में तीसरे घर का स्वामी और मंगल पाप ग्रहों के साथ हों अथवा पाप ग्रहों के राशि में बैठे हों तो उस मनुष्य के भ्राता पैदा ही होकर शीघ्र मर जाते हैं ऐसा जातक शास्त्रज्ञों ने कहा है ॥ १२ ॥

स्त्रीखेटः सहजाधीशः शुक्रो वाथ निशाकरः ।
तत्रगो भगिनीं दत्ते भ्रातरं पुरुषग्रहः ॥१३॥

अन्वयः—सहजाधीशः स्त्रीखेटः वा शुक्रः अथ निशाकरः तत्रगः (तदा) भगिनीं दत्ते (यदि) पुरुषग्रहः सहजाधीशः (तथा पुरुष ग्रह-स्तत्र गस्तदा) भ्रातरं दत्ते ॥ १३ ॥

भा०—यदि तीसरे घर का स्वामी स्त्री ग्रह हो अथवा शुक्र वा चन्द्रमा तीसरे घर में बैठा हो तो उस बालक को अधिक बहिनें देते हैं, अथवा यदि तीसरे घर का स्वामी पुरुष ग्रह हों और पुरुषग्रह तीसरे घर में बैठे हों तो विशेष भाई देते हैं ॥ १३ ॥

अथ चतुर्थभावविचारः—

सुखपतिः सुखगस्तनुनाथयुग्-
जनयति प्रवरालयभङ्गिनाम् ।

त्रिकगतो विपरीतमिहादिभिः
सुखजनुः पतिरेव तया बुधैः ॥ १४ ॥

अन्वयः— (यदा) सुखपतिः तनुनाथयुक् सुखगः (तदा) अङ्गिनां प्रवरालयं जनयति, (यदा) त्रिकगतः (तदा) विपरीतं तथा सुखजनुः पतिरेव-इहादिभिः बुधैः (कथिम्) ॥ १४ ॥

भा —यदि चौथे घर का स्वामी लग्नेश के साथ २ चौथे घर में बैठा हो तो मनुष्यों को बहुत बड़े २ महल मिलते हैं, यदि उक्त दोनों ग्रह त्रिक (६, ८, १२) घ में बैठे हों तो उत्तम रमणीय पूर्वजों का बनवाया हुआ भी गृह बिक जाता है ऐसा चौथे और लग्न के स्वामी से प्राचीनाचार्यों ने फल कह रखा है ॥ १४ ॥

सुखाधीशे जीवे सुखनिवहचिन्ता भृगुसुते
विभूषायोषाङ्गप्रवरतुरगाणामपि बुधे ।
अगौ मन्दे नीचोद्भवसुखमतेरेवदिनपे
पितुश्चन्द्रे मातुः क्षितिनिकरचिन्ता क्षितिसुते ॥१५॥

अन्वयः—जीवे सुखाधीशे (तदा) सुखनिवहचिन्ता भृगुसुते बुधेपि (सुखाधीशे तदा) विभूषायोषाङ्गप्रवरतुरगाणां (चिन्ता) अगौ मन्दे (तदा) नीचोद्भवसुखमतेरेव दिनपे पितुः, चन्द्रे मातुः (तथा यदि) क्षितिसुते (सुखाधीशे तदा) क्षितिनिकर चिन्ता (भवति) ॥ १५ ॥

भा०—जिसके जन्मकाल में बृहस्पति चौथे घर का स्वामी हो तो वह मनुष्य अपने सुखके लिये विशेष चिन्ता करता है अर्थात् अत्यधिक सुख मिलने पर भी अधिक सुखके लिये चिंता करता है शुक्र और बुध चतुर्थेश हों तो भूषण, स्त्री ? । [illegible] त्यादि सवारियों का सुख होता हुआ भी अधिक के लिये चिंता करता है। राहु अथवा शनि चतुर्थेश हों तो नीच मनुष्यों से विशेष सुख की चिंता करता है सूर्य चतुर्थेश हो तो पिताके सुख का, चंद्रमा चतुर्थेश हो तो माता के सुख का और यदि मङ्गल चतुर्थेश हो तो विशेष भूमि लाभ होने की चिंता करता है ॥ १५ ॥

त्रिकोणे वाहनाधीशे केन्द्रे च बलसंयुते
निजोच्चादिपदे नूनं वाहनं नूतनं भवेत् ॥ १६ ॥

अन्वयः—(यदा) बलसंयुते (अर्थात्) निजोच्चादिपदे वाहनाधीशे त्रिकोणे, केन्द्र (गते तदा) नूतनं वाहनं नूनं भवेत् ॥ १६ ॥

भा०—यदि बलवान् अर्थात् अपने उच्च स्थान अपने गृह अथवा अपने षड्वर्गादि स्थानों में होकर चतुर्थ स्थान का स्वामी जन्मलग्न से पाँचवें, नवें अथवा केंद्र (१, ४, ७, १०) स्थान में बैठा हो तो उस मनुष्य को नये नये वाहनों का सुख अवश्य होता है ॥ १६ ॥

अथ पञ्चमभावविचारः—

लग्नाधीशे कुजक्षेत्रे पुत्रभावपतावरौ ।
म्रियते प्रथमापत्यं ततोऽपि न सुतोद्गमः ॥१७॥

अन्वयः—(यदा) लग्नाधीशे कुजक्षेत्रे (तथा) पुत्रभावपतौ अरौ (तदा) प्रथमापत्यं म्रियते ततोऽपि सुतोद्गमः न (भवेत्) ॥ १७ ॥

भा०—अब पञ्चमभाव विचार करते हुए कहते हैं–कि यदि तनु भाव का स्वामी मङ्गल के घर [१, ८] में बैठा हो और पाँचवें घर का स्वामी छठें स्थान में बैठा हो तो उस मनुष्य को एक संतान होकर मर जाने के बाद फिर संतानोत्पत्ति नहीं होती है ॥ १७ ॥

षडादित्रयगे नीचे पुत्रेशे पापसंयुते ।
काकवन्ध्यापतिस्तत्र केतुचन्द्रसुतौ यदा ॥ १८ ॥

अन्वयः—(यदा) पापसंयुते पुत्रेशे षडादित्रयगे (वा) नीचे (गते तथा) तत्र केतुचन्द्रसुतौ (तदा) काकवन्ध्या पतिः (भवति) ॥ १८ ॥

भा०—जिसके जन्मसमय में पापग्रहों के साथ २ पाँचवें घर का स्वामी छठें, आठवें बारहवें घर में बैठा हो अथवा पञ्चमेश नीचादि स्थान में बैठा हो और केतु, बुध पाँचवें घर में बैठे हों तो वह मनुष्य काक वन्ध्या का पति होता है अर्थात् उसके स्त्री के गर्भ से सिर्फ एक ही संतान पैदा होती है ॥ १८ ॥

तदीशो नीचगो यत्र पुत्रभां न पश्यति ।
तत्रैव बुधमन्दौ वा काकवन्ध्यापतिर्भवेत् ॥ १९ ॥

अन्वयः—यत्र तदीशो नीचगः वा पुत्रभावं न पश्यति (तथा तत्रैव बुधमन्दौ (गतौ तदा) काकवन्ध्या पतिर्भवेत् ॥ १९ ॥

भा०—जिसके पाँचवें घरका स्वामी अपने नीच स्थान में बैठा हो अथवा

कहीं भी बैठकर अपने (पांचवें) घर को पूर्ण दृष्टि से न देखता हो और पांचवें घर में बुध, शनैश्चर बैठे हों तो वह मनुष्य काकवन्ध्या का पति होता है ॥१९॥

धर्माधीशोऽङ्गगो नीचे सुतेशो यदि जन्मनि ।
केतुज्ञौ पञ्चमे स्यातां पुत्रं कष्टाद्विनिर्दिशेत् ॥ २० ॥

अन्वयः—जन्मनि यदि धर्माधीशोऽङ्गगः, सुतेशः नीचे (तथा) केतुज्ञौ पञ्चमे स्यातां तदा) कष्टात् पुत्रं विनिर्दिशेत् ॥ २० ॥

भा०—जन्मकाल में यदि नवमेश लग्न में बैठा हो, पञ्चमेश नीच स्थान में बैठा हो और केतु बुध पांचवें घर में बैठे हों तो अत्यन्त कष्ट (अनुष्ठान दानादि) से पुत्र पैदा होता है ऐसा कहना चाहिये ॥ २० ॥

पञ्चमाधिपतिः केन्द्रे त्रिकोणे वा शुभैर्युतः ।
तदा पुत्रसुखं सद्यो विलोमेन विलम्बतः ॥ २१ ॥

अन्वयः- (यदा) शुभैर्युतः पञ्चमाधिपतिः केन्द्रे त्रिकोण वा (गः तदा सद्यः पुत्रसुखं, विलोमेन विलम्बतः (भवति) ॥ २१ ॥

भा०— यदि शुभ ग्रहों से युक्त पांचवें घरका स्वामी केन्द्र (१, ४, ७, १०) स्थान अथवा पांचवें, नवें घर में बैठा हों तो उस मनुष्यको शीघ्र पुत्र सुख होता है यदि पञ्चमेश त्रिक (६, ८, १२) स्थान में बैठा हो तो विलम्बसे पुत्र-सुख होता है ॥ २१ ॥

सन्तानभवनाधीशो जन्मलग्नाधिपस्तथा ।
नरराशौ तदा पुत्रः स्त्रीराशौ कन्यका भवेत् ॥ २२ ॥

अन्वयः-(यदा) सन्तानभवनाधीशः, तथा जन्मलग्नाधिपः नरराशौ (गस्तथा विषम नवांशगः) तदा पुत्रः भवेत् (यदा) स्त्री राशौ (गस्तदा) कन्याका भवेत् ॥ २२ ॥

भा०—यदि पांचवें घरका स्वामी और जन्मलग्न का स्वामी विषम राशि और विषम राशि के नवांश (१, ३, ५ इत्यादि) में बैठे हों तो उस मनुष्यको पुत्र पैदा होता है, यदि समराशि या समराशि के नवांश में उक्त दोनों ग्रह बैठे हों तो कन्या पैदा होती हैं ॥ २२ ॥

अथ शत्रुभावविचारः—

रोगेशो लग्नगो यस्य निधनाथोऽपि जन्मनि
व्रणोदयस्तु सर्वाङ्ग सपापो न व्रणं दिशेत् ॥ २३ ॥

अन्वयः—यस्य जन्मनि रोगेशः लग्नग निधनस्थोऽपि (वा तस्य) सर्वांगे व्रणोदयः, तु सपापः (तदा) न व्रणां दिशेत् ॥ २३ ॥

भा०--जिसके जन्मकाल में छठे घरका स्वामी लग्न अथवा आठवें घर में बैठा हो तो उस मनुष्यके सब अंगों में फुंसी फोड़े होते हैं, यदि षष्ठेश पाप ग्रहों के साथ हो तो व्रणादि नहीं होने देता है ॥ २३ ॥

एवं तातादिभावेशास्तत्तत्कारकसंयुताः
व्रणाधिपयुताश्चापि षडादित्रयभावगाः ॥ २४ ॥
तेषामपि व्रणं वाच्यं जातकज्ञैः सुकोविदैः ।
कारकस्य दशाकाले व्रणमागन्तुकं दिशेत् ॥ २५ ॥

अन्वयः-एवं तातादि भवेशः तत्तत्कारकसंयुताः व्रणाधिपयुताश्चापि षडादित्रयभावगाः (तदा) तेषामपि व्रणं जातकज्ञैः सुकोविदैः वाच्यम्, कारकस्य दशाकले व्रणमागन्तुकं दिशेत् ॥ २४-२५ ॥

भा०--इसी प्रकार पिता, माता और भ्राता इत्यादि भावोंके स्वामी उक्त भावोंके कारकके साथ और उस उस भावोंसे षष्ठेशके साथ (तीनों ग्रह) छठें आठवें तथा बारहवें घरमें बैठें हों तो उन उन मनुष्यों को फुन्सी फोड़ा होता है ऐसा जातकशास्त्र के जाननेवाले विद्वानों से कहा गया है। कारक ग्रहकी दशा और षष्ठेशका अन्तर अथवा स्थानेश, कारकेश और षष्ठेशके दशान्तर्दशा में फुंसी फोड़े, विस्फोटकादि व्रण होते हैं। जैसे भ्राता के विचारमें तीसरे स्थान का स्वामी, तीसरे घरका कारक ग्रह (मंगल) और तीसरे घरसे छठवां (लग्न से आठवां) घरका स्वामी, ये तीनों ग्रह त्रिक स्थान में बैठे हों तो इन ग्रहोंके दशान्तर्दशा में भ्राता को व्रण विस्फोटकादि भय कहना चाहिये ॥ २४-२५ ॥

शिरोदेशे भानुर्मुखपरिसरे शीतगुरलं
धरासूनुः कण्ठे जनयति बुधो नाभिनिकटे ।
गुरुर्नासामध्ये पदनयनयोरेव भृगुजः
शनी राहुः केतुर्व्रणमुदरभागे जनिमताम् ॥ २६ ॥

अन्वयः-जनिमतां (पूर्वोक्तयोगकारकः) भानुः शिरोदेशे, शीतगुः मुखपरिसरे धरासूनुः कण्ठे, बुधः नाभिनिकटे, गुरु नासामध्ये, भृगुजः पदनयनयोः (तथा शनी राहुःकेतुः उदरभागे अलं व्रणं जनयति ॥ २६ ॥

भा०-जिस मनुष्य के जन्मकाल में षष्ठेश अथवा उक्त योग कारक ग्रह हों सूर्य तो शिर में चन्द्रमा मुख और गाल के ऊपर, मङ्गल कण्ठ में, बुध नाभि के पास में, वृहस्पति नाक के ऊपर, शुक्र पैर तथा नेत्रोंमें और शनि राहु केतु योग-कारक हों तो उदर में फुन्सी फोड़ा इत्यादि करते हैं ॥ २६ ॥

लग्नेशो यदि भौमभे बुधयुतो रोगं मुखे जन्मिनां
रोगाङ्गाधिपती: यदा कुजबुधौ चन्द्रेण वा राहुणा ।
मन्देनापि युतौ प्रयच्छत इति प्रायोऽङ्गगोरात्रिपो
युक्तो वा तमसा सितं च शनिना कुष्ठं तदा श्यामलम्॥२७॥

अन्वयः-यदि जन्मिनां बुधयुतः लग्नेशः भौमभे (तदा) मुखे रोगं, यदा रोगङ्गाधिपती: कुजबुधौ, चन्द्रेण राहुणा वा मन्देनापि युतौ (तदा कुष्ठादि) रोगं प्रयच्छतः प्रायः तमसा युक्तः रात्रिपः अगंगः तदा सितं कुष्टं (यदि) शनिना युक्तः अंगगः तदा श्यामल कुष्ठमिति (ददति) ॥ २७ ॥

भा०—यदि जन्मकाल में बुधके साथ २ लग्नेश मेष अथवा वृश्चिक राशि में बैठा हो तो मनुष्यों के मुखमें रोग होता है, यदि षष्ठेश तथा लग्नेश मंगल बुध हो और ये दोनों चन्द्रमा, राहु अथवा शनि के साथ २ हों तो कुष्ठादि रोग देते हैं, प्रायः राहु के साथ चन्द्रमा तनु भाव में बैठा हो तो श्वेत कुष्ठ करता है; शनि के साथ लग्नगदत हो तो श्याम (काला) रङ्ग का कुष्ठ करता है ॥२७॥

अथ सप्तमभावविचारः—

विना स्वर्क्षं कलत्रेशस्त्रिकस्थानगतो यदि ।
रोगिणीं तरुणीं दत्ते तथा तुङ्गपदं विना ॥ २८ ॥

अन्वयः—यदि कलत्रेशः विनास्वर्क्षं तथा तुङ्गपदं विना त्रिकस्थानं गतः (तदा) रोगिणीं तरुणी दत्ते ॥ २८ ॥

भा०—अब सप्तम भावका फल कहते हैं--यदि सातवें घर का स्वामी अपने राशि अथवा उच्च नवांशादि को छोड़कर छठें, आठवें अथवा बारहवें घर में बैठा हो तो उस मनुष्य को रोगी स्त्री देता है ॥ २८ ॥

जायास्थानगते शुक्रे कामी भवति मानवः ।
पापभे पापसंयुक्ते कवौ नारीसुखोज्झितः ॥ २९ ॥

अन्वयः—(यदा) शुक्रे जायास्थानगते (तदा) मानवः कामी भवति, कवौ पापभे पापसंयुक्ते (तदा) नारी सुखोज्झितः भवति ॥ २९॥

भा०—यदि शुक्र सातवें घरमें बैठा हो तो मनुष्य कामी होता है, यदि शुक्र पापग्रहके राशिमें अथवा पापग्रह के साथ बैठा हो तो वह पुरुष स्त्रियों के सुखसे वञ्चित होता है ॥ २९ ॥

चतुर्थे महिलाधीशे लग्ने लग्नाधिपे यदा ।
कलत्रे वा कुटुम्बे वा व्यभिचारी नरो भवेत् ॥ ३० ॥

अन्वयः—यदा महिलाधीशे चतुर्थे, लग्नाधिपे लग्ने वा कलत्रे वा कुटुम्बे (गते तदा) नरः व्यभिचारी भवेत् ॥ ३० ॥

भा०—यदि सातवें घरका स्वामी चौथे घरमें बैठा हो और लग्नका स्वामी लग्न, सातवें अथवा दूसरे घर में बैठा हो तो वह मनुष्य व्यभिचारी (किसी भी कुलके स्त्रियों के साथ भोग करनेवाला) होता है ॥ ३० ॥

यावन्तो निधने खेटा निजस्वामिसमीक्षिताः ।
तावन्तोऽपि विवाहाः स्युः प्राणिनां कथिता बुधैः ॥ ३१ ॥

